.. shrI gAyatri aShTakamu ..

# ॥ श्री गायत्रि अष्टकमु ॥

उषःकालगम्या मुदात्त स्वरूपां
अकार प्रविष्टा मुदारांग भूषाम्
अजेशादिवंद्या मजार्चांग भाजा
मनौपम्यरूपां भजाम्यादि संध्याम् १
सदाहंसयानां स्पुरद्रत्नं वस्त्रां
वरा भीति हस्तां खगाम्नायरूपाम्
स्फुरत्साक्रधिका मक्षमालांच कुंभं
दधा नामहं भावये पूर्यसंध्याम् २
स्फुरचचंद्र कांतां शरच्चंद्र वक्तालि
महा चंद्रकांताद्रि पीनस्तनाढ्याम्
त्रिशूलाक्षहस्तां त्रिनेत्रस्यपत्नीलि
वृषारूढ पादां भजे मध्यसंध्याम् ३
सदासामगान प्रियां श्यामलांगीं
अकारांतरस्थां करोल्लासि चक्राम्
गणापद्महस्तां स्वनत्सांचजन्यां
खगेशोपविष्टां भजेमास्त संध्याम् ४
प्रगल्भ स्वरूपां स्फुरत्कंकणाढ्यालि
सदांलंब मानस्तन प्रांतहाराम्
महा नीलरत्न प्रभाकुंडलाढ्यालि
स्फुरत्सेर वक्तां भजेतुर्य संध्याम् ५
हृदंभोजमध्ये पराम्नायनीडे
सुखासीन सद्राज हंसां मनोज्ञाम्
सदाहेमभासां त्रयीविद्य मध्यां
भजामस्तुवामो वदाम स्मरामः ६
सदातत्पदैस्तूयमानां सवित्रीं
वरेण्यां महा भर्गरूपां त्रिनेत्राम्
सदा देवदेवादि देवस्यपत्नी
महंधी महीत्यादि पादैकजुष्टाम् ७
अनाथं दरिद्रं दुराचारयुक्तं
शतं स्थूलबुद्धिं परं धर्महीनं
त्रिसंध्यां जपध्यान हीनं महेशि
प्रसन्नंच मांपालयत्वं कृपाइभणश ८

इतीदं भुजंगं पठेद्यस्तु भक्त्या
समादाय चित्ते सदा तां परांचां
त्रिसंध्य स्वरूपां त्रिलोकैकवंद्यां
समुक्तोभवेत्सर्व पापैरजस्रम् ९

---

Please send corrections to sanskrit@cheerful.com
Last updated April 1, 2002